'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 3rd Semester Examination, 2021

## CC6-SANSKRIT

## CLASSICAL SANSKRIT LITERATURE (DRAMA)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

विभाग-क

1. संस्कृतभाषया देवनागरीलिप्या च एकस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) स्वप्नवासवदत्तमिति नाटके प्रथमाङ्के वर्णितस्य ब्रह्मचारिवृत्तान्तस्य नाटकीय-तात्पर्य-मालोच्यताम्।

(ख) स्वप्नवासवदत्तमिति नाटकमवलम्ब्य मन्त्रिणः यौगन्धरायणस्य भूमिका आलोच्यताम्।

2. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 6×1 = 6

(क) प्रद्वेषो बहुमानो वा संकल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता॥

(ख) सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥

3. वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः) – 3×2 = 6

(क) कस्यार्थः कलसेन को मृगयते वासो यथानिश्चितं
दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।
आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया
यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्॥

(ख) खगा वासोपेताः सलिलमवगादो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दुराद् रविरपि च संक्षिप्तकिरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम्॥

(ग) यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
अथायं विभ्रमो वा स्याद् विभ्रमोह्यस्तु मे चिरम्॥

4. संस्कृतभाषया देवनागरीलिप्या च प्रश्नद्वयं समाधेयम् – 3×2 = 6

(क) कः आसीत् महासेनः ? कथं तस्य एवमभिधानम् ?

(ख) 'स्वप्नवासवदत्तम्' इति नाटकस्य प्रथमाङ्कस्य नाम किम् ? नाटके कुत्र स्वप्नदृश्यमुपलभ्यते ?

(ग) का आसीत् पद्मावती ? वासवदत्तया सह तस्याः सम्पर्कः कीदृशः आसीत् ?

विभाग-ख

5. अधोलिखितेषु कस्यापि एकस्य उत्तरं देयम् – 12×1 = 12

(क) अभिज्ञानशकुन्तलम् इति नाटके ऋषेः दुर्वाससः शापवृत्तान्तस्य तात्पर्यं आलोचयत।

(ख) 'अभिज्ञानशकुन्तलम्' इति नाटकमवलम्ब्य विदूषकस्य चरित्रम् आलोच्यताम्।

6. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 6×1 = 6

(क) यात्येकतोऽस्तशिखरं पतिरोषधीना
माविष्कृतोऽरुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवान्त्मदशान्तरेषु॥

(ख) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

7. संस्कृतभाषया देवनागरीलिप्या च प्रश्नद्वयं समाधेयम् – 3×2 = 6

(क) किं नाम भरतवाक्यम् ? 'अभिज्ञानशकुन्तलम्' इति नाटकस्य भरतवाक्ये कस्याः देवतायाः स्तुतिरस्ति ?

(ख) 'पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि'। कदा केन कस्मै च इदमुक्तम् ? 'चक्रवर्ती' इत्यस्य कोऽर्थः ?

(ग) अभिज्ञानशकुन्तलम् इति पदस्य व्युत्पत्तिः निर्णेया।

8. श्लोकपादपुरणं कुरुत (एकस्य देवनागरीलिप्या) – 6×1 = 6

(क) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्त दृष्टिः
..........................................................................।
..........................................................................
..........................................................................॥

(ख) प्रवर्ततां प्रकृतिहिताय पार्थिवः
....................................................।
....................................................
....................................................॥

——×——